ಒಟ್ಟು ಮುದ್ರಿತ ಪುಟಗಳ ಸಂಖ್ಯೆ : 8 ]
Total No. of Printed Pages : 8 ]
ಒಟ್ಟು ಪ್ರಶ್ನೆಗಳ ಸಂಖ್ಯೆ : 47 ]
Total No. of Questions : 47 ]
ಸಂಕೇತ ಸಂಖ್ಯೆ: **67-S**

**Code No. : 67-S**

**C**

**CCE PR**
**REVISED**

Question Paper Serial No. **11**

इतः कर्तयत

# ವಿಷಯ : ತೃತೀಯ ಭಾಷೆ — ಸಂಸ್ಕೃತ
# Subject : Third Language — SANSKRIT
# तृतीय भाषा — संस्कृतम्

**( ಹೊಸ ಪಠ್ಯಕ್ರಮ / New Syllabus )**
**(ಪುನರಾವರ್ತಿತ ಖಾಸಗಿ ಅಭ್ಯರ್ಥಿ / Private Repeater)**

ದಿನಾಂಕ : 25. 09. 2020 ] [ Date : 25. 09. 2020
ಸಮಯ : ಬೆಳಗ್ಗೆ 10-30 ರಿಂದ ಮಧ್ಯಾಹ್ನ 1-30 ರವರೆಗೆ ] [ Time : 10-30 A.M. to 1-30 P.M.
ಗರಿಷ್ಠ ಅಂಕಗಳು : 100 ] [ Max. Marks : 100

TEAR HERE TO OPEN THE QUESTION PAPER
प्रश्नपत्रमुद्घाटयितुमितः कर्तयत

### *ಪರೀಕ್ಷಾರ್ಥಿಗಾಗಿ ಸಾಮಾನ್ಯ ಸೂಚನೆಗಳು :*

1. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯು 47 ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳನ್ನು ಹೊಂದಿದೆ.
2. ಈ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಹಿಮ್ಮುಖ ಜಾಕೆಟ್ ಮೂಲಕ ಮೊಹರು (ಸೀಲ್) ಮಾಡಲಾಗಿದೆ. ಪರೀಕ್ಷೆ ಪ್ರಾರಂಭವಾಗುವ ಸಮಯಕ್ಕೆ ನಿಮ್ಮ ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಬಲಬದಿ ಪಾರ್ಶ್ವವನ್ನು ಕತ್ತರಿಸಿ, ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯಲ್ಲಿ ಎಲ್ಲಾ ಪುಟಗಳು ಇವೆಯೇ ಎಂದು ಪರೀಕ್ಷಿಸಿಕೊಳ್ಳಿ.
3. ವಸ್ತುನಿಷ್ಠ ಮತ್ತು ವಿಷಯನಿಷ್ಠ ಮಾದರಿಯ ಪ್ರಶ್ನೆಗಳಿಗೆ ಕೊಟ್ಟಿರುವ ಸೂಚನೆಗಳನ್ನು ಪಾಲಿಸಿ.
4. ಬಲ ಭಾಗದಲ್ಲಿ ಕೊಟ್ಟಿರುವ ಅಂಕಿಗಳು ಪ್ರಶ್ನೆಗಳಿಗಿರುವ ಪೂರ್ಣ ಅಂಕಗಳನ್ನು ತೋರಿಸುತ್ತವೆ.
5. ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯನ್ನು ಓದಿಕೊಳ್ಳಲು 15 ನಿಮಿಷಗಳ ಕಾಲಾವಕಾಶವು ಸೇರಿದಂತೆ, ಉತ್ತರಿಸಲು ನಿಗದಿಪಡಿಸಲಾದ ಸಮಯವನ್ನು ಪ್ರಶ್ನೆಪತ್ರಿಕೆಯ ಮೇಲ್ಭಾಗದಲ್ಲಿ ಕೊಡಲಾಗಿದೆ.

### *परीक्षार्थिनां सामान्यसूचनाः*

1. अस्मिन् प्रश्नपत्रे सप्तचत्वारिंशत् (47) वस्तुनिष्ठाः विषयनिष्ठाश्च प्रश्नाः सन्ति ।
2. इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति । परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत । प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति इति वा पर्यालोचयत ।
3. व्यक्तिनिष्ठानां वस्तुनिष्ठानाञ्च प्रश्नानां विषये निर्दिष्टाः नियमाः अनुपालनीयाः ।
4. प्रश्नानां प्रति अधिकृताः अङ्काः पार्श्वे लिखिताः सन्ति ।
5. प्रश्नपत्रमुत्तरयितुं निर्धारितः समयावधिः प्रश्नपत्रस्य उपरि भागे लिखितः अस्ति । पञ्चदशनिमेषाः प्रश्नपत्रस्य पठनार्थं निर्धारिताः सन्ति ।

Tear here

I. **अधोलिखितप्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः । तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह उत्तरपत्रिकायां लिखत ।** 10 × 1 = 10

1. "जनकः" अस्य समानार्थकपदम् इदं भवति ।

   (A) माता (B) पिता

   (C) भ्राता (D) नेता ।

2. "तमः" अस्य विरुद्धार्थकपदम् इदं भवति ।

   (A) सकाशः (B) आकाशः

   (C) प्रकाशः (D) अवकाशः ।

3. "रामः" अत्र एषा विभक्तिः भवति ।

   (A) प्रथमा विभक्तिः (B) द्वितीया विभक्तिः

   (C) पञ्चमी विभक्तिः (D) सप्तमी विभक्तिः।

4. "गच्छति" अत्र एषः लकारः भवति ।

   (A) लिट् लकारः (B) लृट् लकारः

   (C) लेट् लकारः (D) लट् लकारः ।

5. "अयच्छत्" अत्र एषः पुरुषः भवति ।

   (A) प्रथमपुरुषः (B) मध्यमपुरुषः

   (C) उत्तमपुरुषः (D) अन्यपुरुषः ।

6. "श्रुत्वा" अत्र एषः प्रत्ययः अस्ति ।

   (A) क्तवत् प्रत्ययः (B) तुमुन प्रत्ययः

   (C) तव्यत् प्रत्ययः (D) क्त्वा प्रत्ययः ।

7. "बालकः <u>विद्यालये</u> पठति" । अत्र रेखाङ्कितपदस्य कारकम् इदं भवति ।

   (A) सम्प्रदानकारकम् (B) अपादानकारकम्

   (C) करणकारकम् (D) अधिकरणकारकम् ।

8. ''मध्यमः'' अत्र अर्थविवरणम् एवं भवति ।

(A) अन्ते भवः (B) आदौ भवः

(C) मध्ये भवः (D) पश्चात् भवः ।

9. एषु समूहेतरपदम् इदं भवति ।

(A) कृत्वा (B) गत्वा

(C) विमृश्य (D) नत्वा ।

10. कर्मकारकस्य विभक्तिः एषा भवति ।

(A) प्रथमा विभक्तिः (B) द्वितीया विभक्तिः

(C) तृतीया विभक्तिः (D) चतुर्थी विभक्तिः ।

II. **चतुर्थं पदं लिखत ।** 5 × 1 = 5

11. वदतु – संस्कृतम् :: जयतु – ......................... ।

12. मेरठ्नगरं गतवान् – विवेकानन्दः :: ग्रन्थालयं गतवान् – .............................. ।

13. दाशरथिः – रामः :: आञ्जनेयः – ......................... ।

14. कालपर्ययात् शिक्षा – क्षयं गच्छति :: सुबद्धमूलाः पादपाः – .............................. ।

15. तमोघ्नः – सूर्यः :: प्रणमतां चिन्तामणिः – ......................... ।

III. **एकवाक्येन उत्तरं लिखत ।** 5 × 1 = 5

16. विशिष्टाद्वैतसिद्धान्तप्रतिपादकः कः ?

17. लङ्कानगरं केषां राजधानी ?

18. कः कुण्डलीकृतनागेन्द्रः ?

19. तनुवाग्विभवः कः ?

20. तद्धितान्तं नाम किम् ?

IV. **द्वित्रैः** वाक्यैः उत्तरं लिखत । 6 × 2 = 12

21. विश्वसंस्कृतपुस्तकमेला कुत्र सम्पन्ना ? मेलायाः आयोजिका संस्था का ?

22. मेलुकोटे क्षेत्रे आकर्षकस्थानानि कानि ?

23. कीदृशः महाबलः वः पातु ?

24. कः महाभारतं रचितवान् ? भगवद्गीता महाभारतस्य कस्मिन् पर्वणि अस्ति ?

**अथवा**

कतिविधाः जनाः देवं भजन्ते ? ते च के ?

25. हनूमान् सीतायै किं प्रायच्छत् ? कम् आदाय लङ्कातः प्रतस्थे ?

26. कालपर्ययात् का क्षयं गच्छति ? किं किं च शाश्वतं तिष्ठति ?

V. **संस्कृतभाषया अनुवादं कुरुत ।** 1 × 2 = 2

27. ವಾಯುವು ಎಲ್ಲಾ ಕಡೆ ಸಂಚರಿಸುತ್ತದೆ. ಗಾಳಿ ಇಲ್ಲದೆ ಪ್ರಾಣಿಗಳು ಬದುಕಲಾರವು.

Air is everywhere, Animals can't live without air.

VI. **कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत ।** 1 × 2 = 2

28. भारतदेशे कृषकाः ग्रामेषु निवसन्ति । ते क्षेत्रेषु श्रमेण कार्यं कुर्वन्ति ।

VII. 29. **विग्रहवाक्यं लिखत ।** 1 × 2 = 2

a) महोत्सवः ।

b) शूलपाणिः ।

**अथवा**

समस्तपदं लिखत ।

a) पुराणस्य कथा = ................

b) दिनं दिनम् = ................

VIII. **लक्षणं विलिख्य अलङ्कारस्य नाम लिखत ।** 1 × 2 = 2

30. "पदारविन्दम्" ।

IX. **यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत ।** 2 × 3 = 6

31. "गच्छ अद्य अहं पुस्तकं न दास्यामि ।"

क: पाठः ? कः अवदत् ? कम् अवदत् ?

32. "सागर इव तिष्ठतु ते यशः"

कः पाठः ? कः अवदत् ? कम् अवदत् ?

X. 33. **सन्धिं विभज्य नाम लिखत ।** 1 × 3 = 3

a) सेवक इति

b) वदनाम्बुजे

c) युगादारभ्य ।

XI. **प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दसः नाम लिखत ।** 1 × 3 = 3

34. "साहित्यसङ्गीतकलाविहीनः" ।

XII. **कवेः देश-काल-कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** 2 × 3 = 6

35. डा० वा०श्री० रामकृष्णराव् ।

**अथवा**

महर्षिः वेदव्यासः ।

36. भोजराजः ।

XIII. **पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया, संस्कृतभाषया, आङ्ग्लभाषया वा लिखत ।** 4 × 3 = 12

37. श्रद्धाबाँल्लभते ज्ञानं तत्परस्संयतेन्द्रियः ।

ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ।।

38. प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।

सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ।।

39. अशनं भिन्नं वसनं भिन्नम्

रूपं भिन्नं रीतिरपि ।

भिन्नं भाग्यं भिन्नो वर्णः

भिन्नं सर्वं भेददृशे ।।

40. आकारसदृशप्रज्ञः प्रज्ञयासदृशागमः ।

आगमैः सदृशारम्भः आरम्भसदृशोदयः ।।

XIV. **पद्यपाठस्य नाम विलिख्य पद्यं पूरयत ।** $1 \times 3 = 3$

41. आरम्भगुर्वी ..........................................................................

.......................................................................................... ।

..........................................................................................

........................................................................ खलसज्जनानाम् ॥

XV. **दशवाक्यैः उत्तरं कर्नाटकभाषया आङ्ग्लभाषया संस्कृतभाषया वा लिखत ।** $3 \times 4 = 12$

42. कुरुक्षेत्रे कर्णार्जुनयोः युद्धं कथम् आसीत् ?

43. ''भारतस्य आदर्शनारी उभयभारती'' कथम् ? वर्णयत ।

**अथवा**

''विक्रमः वेतालश्च'' पाठस्य कथां लिखत ।

44. ''सनातनी नो बध्नाति'' पाठानुसारं भारतस्य विविधतायाम् एकतां वर्णयत ।

XVI. **अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।** 1 × 5 = 5

45. नदीषु नर्मदानदी पवित्रतमा वर्तते । एषा नदी मध्यप्रदेशे प्रवहति । अस्याः तीरे माहिष्मती नाम नगरी शोभते । माहिष्मती नगरे जनानां सम्पर्कभाषा संस्कृतं वर्तते । तत्र एव प्रख्यातः पण्डितः मण्डनमिश्रः वसति । तस्य धर्मपत्नी उभयभारती । अस्याः पूर्वतनं नाम सरसवाणी । एषा सकलविद्या पारङ्गता । उभयभारती नर्मदा विश्वविद्यालयस्य कुलपतिः अपि आसीत् । भारतस्य आदर्शनारी उभयभारती प्रातस्स्मरणीया वर्तते ।

i) नर्मदानदी कुत्र प्रवहति ?

ii) माहिष्मती नगरे कः वसति ?

iii) मण्डनमिश्रस्य धर्मपत्नी का ?

iv) उभयभारती कस्य विश्वविद्यालयस्य कुलपतिः आसीत् ?

v) भारतस्य आदर्शनारी का ?

XVII. **दशवाक्यैः प्रबन्धं लिखत ।** 1 × 5 = 5

46. ''कर्नाटकराज्योत्सवः''

**अथवा**

''परिसरसंरक्षणम्'' ।

XVIII. **पत्रं लिखत ।** 1 × 5 = 5

47. शिवमोग्ग मण्डलस्य सर्वकारीय विद्यालयस्य छात्रः/छात्रा इति मत्त्वा देहलीनगरे वर्तमानं पितरं प्रति आत्मनः परीक्षासिद्धताविषये पत्र लिखत ।

**अथवा**

कारणं संसूच्य दिनत्रयं विरामं सम्प्रार्थ्य मुख्योपाध्यायं प्रति विरामपत्रं लिखत ।